नियुञ्जीत ब्राह्मणं शास्त्रपारगम्। दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्। परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम्” इति कात्यायनस्मरणाच्च। शास्त्रपारगं बहुशास्त्राभियोगशालिनम्। यथाह स एव “एकं शास्त्रमधीयानो न विद्यात् कार्यनिर्णयम्। तस्माद्बह्वागमः कार्यो विवादेषूत्तमो नृपैः”। एवंविधब्राह्मणालाभे क्षत्रियं वैश्यं वा प्रतिनिदधीत न शूद्रम्। तथा च स एव “यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्” मनुः “जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन। यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम्। तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः”। व्यासः “द्विजान् विहाय यः पश्येत् कार्याणि वृषलैः सह। तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति”। इदं वचनं स्मृतिचन्द्रिकायाममात्यादिस्थानेऽपि शूद्रं वर्जयेत् किन्तु धर्मनिर्णय इत्येवं परमुक्तम् दोषातिशयकीर्त्तनात्। कल्पतर्वादिषु तु प्रकरणाद्व्यवहारदर्शन एव शूद्रवर्जकत्वेन लिखितम्। अयञ्च प्रतिषेधोऽदृष्टार्थ एव राष्ट्रक्षोभादेरदृष्टद्वारकफलस्यैव सङ्कीर्त्तनात्। चण्डेश्वरेण तु शूद्रस्य धर्मज्ञानेऽपि वेदाविरोधप्रतिसन्धानविरहात् तत्प्रतिसन्धानस्य च सम्यग्निर्णयोपायत्वात् त्याग इति युक्तिरप्युक्ता। सा वणिगादिष्वतिप्रसक्तेत्यन्वाचयमात्रम्। एते च सर्वे व्यवहारसम्बद्धाः प्रतिषेधा अभिषिक्तक्षत्रियाधिकारिकास्तत्स्थानापन्नान्याधिकारिकाश्च। प्राड्विवाकादयस्त्वर्थार्थितया ऋत्विक्स्थानीयाः। सप्राड्विवाक इत्यादिना तेषां गुणभावावगमान्नियोगोक्तेश्च। “राजाभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः। धर्मासनगतः पश्येद्व्यवहाराननुल्वणः” इति प्रजापतिवचनात्। अत्र राजशब्दोऽवयुत्यधिकरणन्यायेन क्षत्रियजातिवचनः। अभिषेकसंयुक्त इति वचनात् स्मृत्यन्तरेऽप्यभिषिक्तक्षत्रियं प्रक्रम्य तदभिधानाच्चानभिषिक्तक्षत्रियस्य नाधिकारः। अतश्च तत्प्रयुक्तशुभाशुभफलयोस्तद्गामितैव। प्राड्विवाकादीनान्तु प्राक्प्रदर्शितेभ्यो न्यायेनापि तं यान्तीत्यादि वाक्येभ्यो राज्ञोऽनिवारणे परं दृष्टादृष्टदोषभागिता। अनियुक्तानान्तु न तत्रापीत्यादि मिताक्षरादौ व्यक्तम्। ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायको वाशब्दो न लक्षकत्वाधिकारपरः। अनुल्वणोऽनुद्धतः”।

प्राण् पु० प्राणिति प्र+अन—क्विप् पदान्तत्वेऽपि णत्वम्। प्राणे

प्राण पु० प्र+अण—करणे घञ्। १ब्रह्मणि त्रिका० “अतएव प्राणः” शा० सू० १।२।१२ अतएव तल्लिङ्गात् प्राणशब्देन ब्रह्मैव तथा हि “सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते” इति छान्दो० उ०। सर्वभूतोत्पत्तिप्रलयहेतुरूपलिङ्गात् ब्रह्मण एव प्राणशब्दवाच्यता १।१।१२ सूत्रभाष्ये दृश्यम्। २पञ्चवृत्तिके देहस्थे वायौ ३बोले काव्यजीवने ४रसे ५अनिले ६बले च ७पूरिते त्रि० मेदि०। ८सूक्ष्मदेहसमष्ट्युपहितचैतन्ये पु० वेदान्तसा०। ९प्राणोपाधिके जीवे “प्राणोह माता प्राणः पितेति” श्रुतिः। भावे घञ्। १०जीवने च नासाग्रवर्त्तिनि प्राणननवति ११वायौ ‘तस्य कर्म नासाग्रतो बहिर्गतिः” श्रीधरस्वामी। देहस्थः पञ्चवृत्तिकः वायुश्च प्राणापानसमानोदानव्यानरूपः तत्रार्थे ब०व०। तेषां स्वरूपादि शा०ति०व्या० योगार्णवे उक्तं यथा “इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्। आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे। प्राणाख्य इति प्राहुः पादाङ्गुष्ठेऽपि केचन। अपानयत्यपानोऽयमाहारं च मलार्पितम्। शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः। इन्द्रगोपप्रतीकाशः सन्ध्याजलदसन्निभः। स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे कृकाभ्यां च नाभिमूले च तिष्ठति। व्यानो व्यानयते चान्नं सर्वव्याधिप्रकोपनः। भृङ्गाञ्जनप्रख्यो हानोपादानकारकः। स चाक्षिकर्णयोर्मध्ये कट्यां वै गुल्फयोरपि। घ्राणस्थाने स्फिग्गुह्यदेशे तिष्ठत्यत्र निरन्तरम्। स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः। उद्वेजयति मर्माणि उदानो नाम मारुतः। विद्युत्पाकसवर्णः स्यादुच्छूनाशनकारकः। पादयोर्हस्तयोश्चापि तत्सन्धिषु च वर्त्तते। पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलात्। समं नयति गात्राणि समानो नाम मारुतः। गोक्षीरसदृशाकारः सर्वदेहे व्यवस्थितः”। स च सांख्यमते इन्द्रियाणां सामान्यकरणवृत्तिरूपः न तु वायुविकारः यथोक्तं सां०सू० प्र०भा०

“सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च” सू०। “प्राणादिरूपाः पञ्च वायुवत्सञ्चारात् वायवो ये प्रसिद्धास्ते सामान्या साधारणी करणस्यान्तःकरणत्रयस्य वृत्तिः परिणामभेदा इत्यर्थः। तदेतत् कारिकयोक्तम्। “स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या। सामान्यकर-